श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५६

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५६

*काळियमर्दने भगवदनुग्रहवर्णनम्*

रुचिरकम्पितकुण्डलमण्डलः सुचिरमीश ननर्तिथ पन्नगे।
अमरताडितदुन्दुभिसुन्दरं वियति गायति दैवतयौवते॥ १ ॥

नमति यद्यदमुष्य शिरो हरे परिविहाय तदुन्नतमुन्नतम्।
परिमथन् पदपङ्करुहा चिरं व्यहरथाः करताळमनोहरम्॥ २ ॥

त्वदवभग्नविभुग्नफणागणे गळितशोणितशोणितपाथसि।
फणिपताववसीदति सन्नतास्तदबलास्तव माधव पादयोः॥ ३ ॥

अयि पुरैव चिराय परिश्रुतत्वदनुभावविलीनहृदो हि ताः।
मुनिभिरप्यनवाप्यपथैः स्तवैर्नुनुवुरीश भवन्तमयन्त्रितम्॥ ४ ॥

फणिवधूगणभक्तिविलोकनप्रविकसत्करुणाकुलचेतसा।
फणिपतिर्भवताऽच्युत जीवितस्त्वयि समर्पितमूर्तिरवानमत्॥ ५ ॥

रमणकं व्रज वारिधिमध्यगं फणिरिपुर्न करोति विरोधिताम्।
इति भवद्वचनान्यतिमानयन् फणिपतिर्निरगादुरगैः समम्॥ ६ ॥

फणिवधूजनदत्तमणिव्रजज्वलितहारदुकूलविभूषितः।
तटगतैः प्रमदाश्रुविमिश्रितैः समगथाः स्वजनैर्दिवसावधौ॥ ७ ॥

निशि पुनस्तमसा व्रजमन्दिरं व्रजितुमक्षम एव जनोत्करे।
स्वपति तत्र भवच्चरणाश्रये दवकृशानुररुन्ध समन्ततः॥ ८ ॥

प्रबुधितानथ पालय पालयेत्युदयदार्तरवान् पशुपालकान्।
अवितुमाशु पपाथ महानलं किमिह चित्रमयं खलु ते मुखम्॥ ९ ॥

शिखिनि वर्णत एव हि पीतता परिलसत्यधुना क्रिययाऽप्यसौ।
इति नुतः पशुपैर्मुदितैर्विभो हर हरे दुरितैः सह मे गदान्॥ १० ॥

**********